**आमुखम्।**

आधुनिककाले वृद्धसदनानि बहूनि जायन्ते। वृद्धजनानां पार्श्ववत्करणमपि संभवति। नवीनपरम्परायाः स्वार्थतत्परता परोपकारविमुखता चेत्यादिकं तत्र कारणं स्यात्। अतः स्वार्थचिन्तां विना स्वमातृपितृसंरक्षणे तात्पर्यं जनयितुम् अयं पाठभागः आयोजितः।

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्।।

व्यासमहर्षिः परोपकारेण पुण्यं, परपीडनेन पापं च भवति इति सूचयति। छात्रेषु परोपकारतात्पर्यम् उत्पादितव्यम्।

| | | |
|---|---|---|
| पाठस्य नाम | - | पितृपरिपालनम् |
| आशयः | - | पितृपरिपालनं, वृद्धजनसेवनं च। |
| उद्देश्यम् | - | आतुरसेवनस्य महत्त्वम् अधिकृत्य ज्ञानम्। |
| नैपुणी | - | श्रवणं, भाषणं, लेखनं, विवेचनम्। |
| सहायकोपकरणानि | - | अभ्यासमञ्जरी |
| समयः | - | १२ कालांशाः। |

| आशयः/धारणा/ व्यवहाररूपाणि | प्रक्रिया/ पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| पितृपरिपालनं वृद्धजनसेवा च। सम्भाषणम्। | स्वाभाविकसम्भाषणावतारणम्। | सम्भाषणं करोति। |
| | पात्रानुसारं सम्भाषणावतारणम्। | पात्रानुसारं सम्भाषणम् अवतारयति। |
| | नूतनपदानां विवेचनम् । अर्थलेखनम्। | क्लिष्टपदानि वदति, पदार्थान् वदति, लिखति च। |
| | क्रियापदचयनम्। | क्रियापदानि वदति। |
| | प्रश्नवाचकपदानां विवेचनं - पूरणं, लेखनं च। | प्रश्नवाचकपदानि विवेचयति। |
| | सुबन्त - तिङन्त अव्ययानां विवेचनम्। | सुबन्त - तिङन्त - अव्ययपदानि विवेचयति। |
| | चर्चाद्वारा सम्भाषणस्य प्रमेयस्य संक्षेपलेखनम्। सम्भाषणपूरणम्। | सम्भाषणं पूरयति। |

**सिद्धताप्रवर्तनम्** - नूतनपदानां विवेचनम्। अर्थलेखनं च।

उद्देश्यम् - नूतनपदपरिचायनम्, अर्थावबोधः च।

प्रक्रिया - अध्यापिका कक्ष्यां प्रविश्य छात्रान् सङ्घान् करोतु। वैयक्तिकरूपेण वाचनं कृत्वा नूतनपदानां चयनाय छात्रान् निर्दिशतु। अध्यापिका प्रतिसङ्घं गत्वा अवश्यं साहाय्यं ददातु।

नूतनपदानां चयनाय, लेखनाय च प्रेरयतु। शब्दकोशं निरीक्ष्य तेषाम् अर्थसम्पादनाय निर्दिशतु। अध्यापिका श्यामफलके साधूत्तराणि लिखतु। छात्राः टिप्पणीपुस्तके अनुलिखन्तु। यथा-

| | | |
|---|---|---|
| अस्वस्थः | - | അസ്വസ്ഥൻ |
| आपन्नम् | - | ഉ ാ യി |
| अपघातः | - | അപകടം |
| उन्मत्तः | - | ഉന്മത്തൻ |
| आतुरालयः | - | ആശുപത്രി |
| पातितः | - | വീഴ്ത്തി |

अधोदत्तानां पदानां समानपदानि पाठभागाद् उद्धृत्य लिखतु।

| पदानि | समानपदानि |
|---|---|
| अवलोकयति | |
| दुर्घटना | |
| प्रमत्तः | |
| अहराम | |
| परिपालनम् | |

**मूल्यनिर्णयसूचिकाः** - अर्थावबोधः, आशयग्रहणं, विवेचनसामर्थ्यम्।

**प्रवर्तनम् १** - पात्रानुसारं सम्भाषणावतारणम्।

उद्देश्यम् - सम्भाषणपरिचायनम्।

प्रक्रिया - अध्यापिका कक्ष्यां प्रविश्य स्वाभाविकसम्भाषणानन्तरम् एकां बालकवितम् आलपतु। छात्राः अनुगायन्तु।

यथा - का त्वं बाले? काञ्चनमाला

कस्याः पुत्री? कनकलतायाः।

किं ते हस्ते? तालीपत्रम्

का वा रेखा? क ख ग घ।।

अनन्तरं छात्राः स्वस्वनामानि उपयुज्य कवितायाः पूरणाय निर्दिशतु।

उदा - का त्वं बाले? मीना।

कस्याः पुत्री? रमायाः।

किं तव करे? पुस्तकम्।

का वा रेखा? अक्षरमाला।

कः त्वं बालः? नन्दकुमारः।

कस्याः पुत्रः? यशोदायाः।

किं तव स्यूते? शर्करा।

किमर्थमेतत्? पायसनिर्माणाय।

इत्यादिरूपेण । अनन्तरम् अध्यापिका छात्रान् सङ्घान् कृत्वा पाठभागस्य वाचनाय निर्दिशतु। पात्रानुसारेण अवतारणाय निर्दिशतु, अध्यापिका अवश्यं साहाय्यं ददातु।

**मूल्यनिर्णयसचिकाः** - सर्वेषां भागभागित्वम्। उचितम् अवतारणम् ।

**प्रवर्तनम् २** - प्रश्नवाचकशब्दानुपयुज्य सम्भाषणपूरणम्।

उद्देश्यानि - सप्तककाराणां परिचायनम्।

प्रक्रिया - चार्ट्पत्रे प्रश्नवाचकशब्दान् विलिख्य प्रदर्शयतु, तान् विशदीकरोतु।

यथा - कः/ का - ആര്?

किम् - എന്ത്?

कदा - എപ്പോൾ?

कति - എത്ര?

कुतः - എവിടെ നിന്ന്?

कुत्र - എവിടെ?

कथम् - എങ്ങിനെ?

तानुपयुज्य लघून् प्रश्नान् पृच्छति।

उदा - रामायणस्य कर्ता कः ?

तव नाम किम् ?

श्रावणोत्सवः कदा आघुष्यते ?

अनन्तरं छात्रान् सङ्घान् कृत्वा पाठभागात् प्रश्नवाचकपदानि चित्वा लेखनाय निर्दिशतु। प्रतिसङ्घम् उच्चैः वाचनाय निर्दिशतु।

**मूल्यनिर्णयसूचिकाः** - शब्दकोशनिरीक्षणम् । अर्थग्रहणम्। लेखनम्।

अनुबन्धप्रवर्तनम्

**प्रवर्तनम् ३** - पदानां विवेचनम्।

उद्देश्यम् - पदपरिचयः। (सुबन्त, तिङन्त, अव्ययपदानां परिचयः)

प्रक्रिया - छात्रान् सङ्घान् कृत्वा बालप्रबोधनस्य वाचनाय निर्दिशतु। आलपनाय निर्दिशतु, मातृभाषायाम् आशयावबोधनार्थं विविधान् प्रश्नान् पृच्छतु। अध्यापिका क्रोडीकृत्य अवतारयतु।

अनन्तरं पट्टिकाकरणाय अधोदत्तरूपेण चार्ट्पत्रं प्रदर्शयतु।

| | | | | | |
|---|---|---|---|---|---|
| रामः | सः | कदा | पठित्वा | पठति | लिखति |
| सा | गत्वा | गच्छति | सीता | विलिख्य | पश्य |

| **नामपदानि** | **क्रियापदानि** | **अव्ययपदानि** |
|---|---|---|
| रामः | पठति | विलिख्य |
| सः | गच्छति | पठित्वा |
| सा | लिखति | गत्वा |
| सीता | पश्य | कदा |

छात्राः पदानि पट्टिकायां योजयन्तु। प्रतिसङ्घं कक्ष्यायाम् अवतारयन्तु।अनन्तरं पाठपुस्तकस्थपठनप्रवर्तने दत्ता पट्टिकां पूरयन्तु छात्राः।

| यथा- | **सुबन्तानि** | **तिङन्तानि** | **अव्ययपदानि** |
|---|---|---|---|
| | सः | पश्यामि | कदा |
| | युवकस्य | अस्ति | कथम् |
| | अपघातः | करोति | स्थित्वा |
| | विद्यालयं | परिचरति | |

**मूल्यनिर्णयसूचिकाः** - अपग्रथनम्, अर्थज्ञानं, विवेचनं, पट्टिकायां निवेशनम्।

**प्रवर्तनम् ४** - अर्थनिर्देशपूर्वकं बालशब्दस्य एकवचनरूपाणां लेखनम्।

उद्देश्यम् - विभक्तिज्ञानम्।

प्रक्रिया - वैयक्तिकरीत्या बालशब्दरूपाणि पठित्वा छात्राः कक्ष्यायाम् अवतारयन्तु । अभ्यासमञ्जर्याः, बालप्रबोधनस्य च वाचनाय निर्दिशतु। विभक्त्यर्थान् अध्यापिका विशदीकरोतु।

तेषां लेखनाय निर्दिशतु। ततः अनुबन्धं पठित्वा अर्थनिर्देशकपूर्वकं बालशब्दस्य एकवचनरूपाणां लेखनाय निर्दिशतु।

बालशब्दस्य एकवचनरूपाणि लिखतु।

**एकवचनम्**

| | | |
|---|---|---|
| प्र. | बालः - ബാലൻ - ഒരു കുട്ടി | |
| सं. प्र. | हे बाल | ഹേ ബാല! |
| द्वि. | बालम् | ബാലനെ, ബാലനോട് |
| तृ. | बालेन | ബാലനാൽ, ബാലനെക്കൊ് |
| च. | बालाय | ബാലനായിക്കൊ് |
| प. | बालात् | ബാലനിൽ നിന്ന്, ബാലനേക്കാൾ |
| ष. | बालस्य | ബാലന്റെ, |
| स. | बाले | ബാലനിൽ |

**मूल्यनिर्णयसूचिका** - विभक्तिज्ञानम्। अर्थावबोधः। विवेचनम्। लेखनम्।

**प्रवृत्तिपुटम्** - अध्यापिका कक्ष्यां प्रविश्य छात्रसंख्यानुसारं प्रवर्तनपुटानि छात्रेभ्यः ददातु। दत्तानां पुटानां पूरणाय निर्दिशतु।

सप्तककारानुपयुज्य वाक्यं पूरयतु।

रामायणस्य कर्ता .............?

पद्मनाभपुरमन्दिरं ............. वर्तते ?

तव नाम ............?

भवान् ............ विद्यालयमागच्छति ?

सूर्यः ............ उदयते ?

महाभारते ............ पर्वाणि सन्ति ?

भवान् ............ आगच्छति ?

उत्तरसूचि

कः , कुत्र, किम्, कथं, कदा, कति, कुतः

अकारान्तपुल्लिङ्गस्य पितामहशब्दस्य सर्वाणि रूपाणि लिखतु ?

यथा-

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | पितामहः | पितामहौ | पितामहाः |
| सं. प्र. | हे पितामह | हे पितामहौ | हे पितामहाः |
| द्वि. | पितामहं | पितामहौ | पितामहान् |
| तृ. | पितामहेन | पितामहाभ्यां | पितामहैः |
| च. | पितामहाय | पितामहाभ्यां | पितामहेभ्यः |
| प. | पितामहात् | पितामहाभ्यां | पितामहेभ्यः |
| ष. | पितामहस्य | पितामहयोः | पितामहानाम् |
| स. | पितामहे | पितामहयोः | पितामहेषु। |